'एतेषा' मिति वैषम्यमेव लिखामः, 'वन षण संभक्तौ' वन्, तुबादिस्थ आनिप्प्रत्ययः, 'अप् कर्त्तरि' 'सवर्णे दीर्घः' ( २-१-१४ ) सह, वनानि। ब्राह्मण सम्बोधनं अग्रे 'इण् गतौ' इ, दिबादिस्प्रत्ययः 'अप् कर्त्तरि' 'अदादेर्लुक्' 'दिबादावद्' 'अइए' ( २-१-१५ ) स्वरादेः 'ए ऐ ऐ' ( २-१-१९ ) ऐः ब्राह्मणैः, हे ब्राह्मण! त्वं ऐः-गच्छ इत्यर्थः। अमोऽस्यास्तीत्यमि 'मान्तोपधाद्वत्विना' विति ( ६-१-३६ ) इन्प्रत्यये अमी। 'अस क्षेपणे' अस् वृक्षपूर्वः, वृक्षान् अस्यतीति क्विप् लोपः, प्रथमैकवचनं सिः १-१ 'हसेपः से०' वृक्षा । 'डु पचञ् पाके' पच्, पचतीति 'शतृशानौ तिप्तेवत्क्रियाया' मिति ( ८-२-१७ ) शतृ

प्रत्ययः, शकारश्चतुर्वत्कार्यार्थः, ऋकारोऽनुबन्धो नुमागमार्थः, 'अप्ययोरा' दिति ( ३-२-३२ ) नुमागमः 'ष्ट्रित्रित' (६-२-४) इतीप्, पचन्ती, धौ ह्रस्वः, हे पचन्ति ! । 'येषृ प्रयत्ने' येष्, येषणं येषा 'गुरोर्हसा' दिति ( ८-४-२० ) अप्रत्ययः, स्त्रीत्वादाप् १-१ तां । 'या प्रापणे' , या यातीति यान्, 'शतृशाना' विति शतृ, 'सवर्णे दीर्घः सहे' ति ( २-१-१४ ) दीर्घः, 'त्रितो नु' मिति ( ३-२-३० ) नुम् १-१ । 'भ्यासि भये' भ्वादिः वायुपूर्वः, वायोर्भ्यसतीति वायुभ्यः, क्विप्प्रत्ययः लोपः, 'हसेपः सेर्लोपः' ( ३-२-३ ) स्रो० । 'असु क्षेपणे' अस् पार्थिवपूर्वः, पार्थिवं अस्यतीति क्विप् लोपः १-१ हसेपः 'स्रोर्विसर्गः' पार्थिवाः । 'षुञ् अभिषवे' षु, 'आदेः ष्णः स्नः' ( ७-४-७७ ) सु सु रापूर्वः, सुरां सुनोतीति क्विप् 'ह्रस्वस्य पिति कृति तुगि' ति ( ८-४-२२ ) तुक्, सुरासुत् तमाचष्टे 'ञिर्डित्करणे' इति ( ७-४-६ ) ञिः, स च डित्, टिलोपे सुरासि, सुरासयतीति क्विप्, लोपः 'ञे'-रिति ( ७-४-७१ ) ञिलोपः सुरास् प्रथमैकवचनं सिः सुराः । यद्वा सुरानस्यतीति सुराः साधना प्राग्वत् । यद्वा रैशब्दः सुपूर्वः शोभना राः सुराः १-१ 'रैस्मी' त्याकारः 'स्रोर्विसर्गः' सुराः ॥ ८ ॥

शेषाणि पूर्वाणि समान्यजानां, फलानि मूलानि हलान्यगूनाम् ।
अभ्राणि नीलानि दलान्यतस्यः, शूलानि कूलानि तटान्यपापाः ॥ ९ ॥

'शेषाणी'ति, इह वक्ष्यमाणे च वृत्ते प्रथमादिबहुवचनान्तप्रतिरूपकाण्येकवचनान्तानि कथं स्युरिति प्रश्नार्थे वयं वच्मः, 'कष शष जष झष वष मष मुष रुष यूष जूष शिष हिंसायां' शिष्पूर्वः 'पर्व(पूर्व)सर्व पूरणे' पूर्व्, 'षम ष्टम वैक्लव्ये' षम्, 'आदेः ष्नः स्नः'(७-४-७७)सम्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तुबाद्युत्तमपुरुषे आनिप्, अप् कर्त्तरी' (७-१-१२) त्यप् शिषधातोरुपधागुणः, स्वरहीनं, सवर्णे दीर्घः सह, शेषाणि पूर्वाणि समानि। 'ज्ञा अवबोधने' ज्ञा, दिवा० अम्, अड् 'ना त्र्यादे' रिति (७-१-२०) ना प्र०,'ज्ञाजनोर्जा' इति ( ७-४-८५ ) जा आदेशः, सवर्णे०, मोऽनुस्वारः, अजानां। 'फल निष्पत्तौ' फल्, 'मूल प्रतिष्ठायां' मूल 'हल विलेखने' हल्, तुबाद्युत्तमपुरुषैकवचने आनिप्, 'अप् कर्त्तरी' त्यप् , सवर्णे दीर्घः सहेति दीर्घत्वे फलानि मूलानि हलानि सिद्ध्यन्ति, यद्वा फलपूर्वः 'णीञ् प्रापणे' णी, 'आदेष्णः स्नः' नी, फलमानयति यत् कुलं क्विप् प्रत्ययः, लोपः, नामसंज्ञायां स्यादिः, प्रथमैकवचने १-१ 'नपुंसकस्ये'ति (४-२-७) ह्रस्वत्त्वे 'नपुंसकात् स्यमोर्लुगिति (३-३-११) सिलोपे फलानि इति सिद्धः, एवमन्यावपि प्रयोगौ। न विद्यते गौर्येषां ते अगवः 'ना'(६-४-५)इति नञोऽकारः, 'गो' (४-२-६) रिति ह्रस्वः, तेषां अगूनामिति बहुवचनान्तं स्यात्, एकवचनान्तं तु 'गु पुरीषोत्सर्गे' गुवति स्म 'गत्यर्थादकर्म्मका'दिति क्तप्रत्ययः, 'ल्वाद्योदितश्चे'ति (८-४-३७) तस्य नत्वं, 'दुग्वोर्दीर्घश्चे'ति ज्ञापकाद्दीर्घत्वे गूना, स्त्रीत्त्वादाप् , न गूना अगूना तां २-१ सिद्धम् । 'अभ्र वभ्र मभ्र गतौ' अभ्र चेरेति गत्यर्थाः, 'नील वर्णे,' नील् , 'दल त्रिफला विशरणे' दल्, आनिप् प्रत्ययः, अपि प्रत्यये इष्टरूपासिद्धिः। अतसीशब्दाज्जसि बहुत्त्वं, एकत्त्वं पुनरित्थं-'तस क्षये' तस्, दिबादि स्प्र०,दिबादावट्,'दिवादेर्यः' (७-१-१५) स्वरहीनं, स्रो०, अतस्य इति सिद्धम् । 'शूल रुजायां' 'कूज आवरणे' 'तट समुच्छ्राये' सर्वत्राकारोऽनुबन्धः, साधना सुगमाऽभ्राणिवत् । 'पा पाने' 'पा रक्षणे' वा, अपपूर्वः, दिबादिः स, 'दिबादावट्' (७-२-४)'भूते सि'रिति(७-२-७) स् प्रत्ययः,'दादेः प'(७-३-१०) इति सिप्रत्ययलोपः, स्रोर्विसर्गः, अपापाः, पर्द्धातुना निष्पादितेन पूर्वश्लोकोक्तेन अनेन प्रयोगेण न पौनरुक्त्यं, धात्वन्तरत्वादर्थान्तरत्वाच्च ॥ ९ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सुखानि शीलानि नखान्यसास्नाः, खलानि पापानि बलान्यचर्चाः ।
पुराणि वर्षाणि मठान्यमीनाः, घनानि सर्वाणि बिलान्यपां च ॥ १० ॥

'सुखानी'ति, कथमेकत्त्वमित्यनुवर्त्तते, सुष्ठु--शोभनाः खानयो यत्र कुले तत् सुखानि १-१, यथा खनिशब्दस्तथा खानिशब्दोऽपि 'खनिः खानी'ति हैमलिंगानुशासनोक्तेः, यद्वा सुखमिवाचरति 'कर्त्तुर्यङ्'(७-४-५) अत्रार्थे क्विरपि वाच्य इति क्विप् प्रत्ययः, 'वे'रिति(८-४-२७) विलोपे आनिप्प्रत्यये सुखानि, अथवा सु-शोभनं खं-छिद्रादि तदिवाचरतीति, अथवा 'अन प्राणने' अन् सुखपूर्वः, सुखेन अनितीत्येवंशीलं 'णिनिरर्तीते' इति णिन्प्रत्ययः, णित्त्वाद् वृद्धौ प्रथमैकवचने 'नपुंसकात् स्यमोर्लुगि'ति(३-३-११)सेर्लुकि सुखानि, यद्वा सुखमानयति यत्कुलं तत् सुखानि, फलानीतिवत्साध्यं,पंचार्थाः।'शील समाधौ''उख नख णख वखे'ति दण्डकधातुः, प्राग्वत्साध्यानि शीलानि नखानि। असास्ना इति न विद्यते सास्ना येषां तेऽसास्नाः 'सास्ना तु गलकम्बल' इत्यमरः इति भूम्नि प्रसिद्धं, एकत्वं तु 'ष्णा शौचे' ष्णा, 'आदेः ष्णः स्नः' 'निमित्ताभावे नैमित्तिकस्याभावः' इति स्ना, अत्यर्थं स्नाति 'अतिशये हसादेर्यङ् 'द्विश्चे'ति (७-३-५७) यङ्-प्रत्ययः, 'वाऽन्यत्रे'ति(८-२-२७) यङ्लुक्, द्वित्वं स्ना स्ना, 'पूर्वस्य हसादिःशेष'इति(७-४-२४) नकार लोपः, 'सधातु' (७-४-१०) रिति दिवादिगणगतसिप्प्रत्ययः स्, 'स्रोर्विसर्गः' असास्नाः। 'खल संचये'खल्, आनिप्प्रत्यये अपि खलानि सिद्धं। 'पा पाने' पा, अत्यर्थं पिबति, अतिशये यङ्, 'वान्यत्रे'ति(८-२-२७)यङ् लुक् 'ह्वादिवच्च द्रष्टव्य'मिति वचनादप्प्रत्ययः, 'ह्वादेर्द्विश्चे' (७-१-१४) त्यपो लुक् द्विश्च, तुबादिपरस्मैपदोत्तमपुरुषैकवचने आनिपि सिद्धं पापानि। 'बल प्राणधारणे' बल्. आनिपि



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





बलानि। न विद्यते चर्चा येषां ते अचर्चाः इति बहुत्त्वं, एकत्वे प्रश्नः, 'चृती ग्रन्थे हिंसायां च' चृत्, 'अतिशये हसादेर्यङि'ति (७-३-५७) यङ्, यङ्लुकि च ह्वादित्वादप् लुक् द्विश्च, 'र' इति(७-४-२८)रत्त्वे 'ऋदन्तानामृदुपधानां चे'ति(८-२-३०)पूर्वस्य रुक्, दिवादिस् प्र०,गुणः, तस्य रत्वे 'रिलोपो दीर्घश्चे'(२-४१२) ति रस्य लुकि पूर्वस्य दीर्घे अचर्चाः, यद्वा चर्चा इवाचरति 'कर्त्तुर्यङि'ति (७-४-५) 'अत्रार्थे क्विरपि वाच्य' इति क्षेमेन्द्रोक्तेः,'वे'रिति(८-४-२७) विलोप, अनद्यतने स् प्रत्ययः, दिबादावद्,स्रोर्वि०,अचर्चाः। 'पुर अग्रगमने' पुर्, तुदादि-तुबादिस्थ आनिप्, तुदादेरप्रत्ययस्यापित्त्वान्नोपधागुणः, णत्त्वं, पुराणि। 'वृष सेचने' वृष् आनिप्, अप्प्रत्ययः, अपः पित्त्वाद् 'उपधाया लघो' रिति(७-४-६०)गुणः, ऋकारस्य अर्, णत्वं, वर्षाणि। 'मठ मदनिवासयोः' मठ्, आनिपि अपि मठानि। न विद्यन्ते मीना-मत्स्या येषु ते अमीनाः, मीनशब्दे सत्ययं समासः, एकत्त्वं तु 'मीञ् हिंसायां' दिवादिसिः, दिबादावद्, 'नाक्र्यादे' रिति (७-१-२०) ना प्र०, स्रोर्वि० अमीना इति सिद्धं। घन इवाचरति 'कर्त्तुर्यङि' ति यङ्, यङ् लोपः आनिपि घनानि रूपं सिद्ध्यति। 'अन प्राणने' अन् सर्वपूर्वः सर्वमनितीत्येवंशीलं 'णिनिरतीते' (८-२-११) णिन् प्रत्ययः, णत्वं १-१ 'नपुंसकात् स्यमोर्लुक्' 'सवर्णे दीर्घः सर्वाणि। 'बिल भेदने' बिल्, आनिप् प्र० 'तुदादेरः'(७-१-१९) गुणनिषेधः बिलानि। 'पा पाने' अनद्यतने अम् दिबादावद् भूते सिः 'दादेः प' इति (७-३-१०) सेर्लोपः 'सवर्णे दीर्घः सह' 'मोऽनुस्वारः' (२-३-१८) अपां,यद्वा 'पा रक्षणे' पा, अनद्यतने अम्, अप्क-र्त्रीत्यप्, अदादेर्लुक् (७-१-१३) सवर्णे दीर्घः सहापामिति सिद्ध्यति॥१०॥ **समुच्चयाच्चकारस्य, स्याद्यन्तं भवतीत्यपि। तथा जग्लो दधौ मम्लौ, ददावित्यादयोऽपरे ॥१॥ जग्ले पपे ददे मम्ले, जज्ञे सस्त्रे मुखास्तथा। विना परोक्षम-भ्यूह्याः, स्याद्यन्ता बहवो बुधैः ॥ २ ॥** अनयोः सोपयोगित्वात् किंचिल्लिख्यते-'भू सत्तायां' भू, भवतीति 'शतृशाना'



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





विति अत्प्रत्ययः, अप् कर्त्तरीत्यप् (७-१-१२) गुणः, ओ अव् , 'ष्ट्न्नित' (६-२-४) इतीप् भवति, सम्बोधने हे भवति!, 'धौ ह्रस्व' इति (३-२-११) ह्रस्वः। 'ग्लै हर्षक्षये' 'म्लै गात्रविनामे' 'डुधां धारणपोषणयोः' 'डुदां दाने' 'पा रक्षणे' 'ला आदाने' 'कै गै रै शब्दे' सन्ध्यक्षराणामा' (७-४-७३) इत्याकारः, ग्लायति स्म म्लायति स्म दधाति स्म ददाति स्म पाति स्म लाति स्म रायति स्म एभ्यो धातुभ्य आदृदितः किर्द्विश्चे' ति (८-२-३१) सूत्रेण कि प्रत्ययः, पश्चाद् द्विर्वचनं ह्रस्वः 'आतोऽनपी (७-४-६९) त्याकारलोपः, स्वरहीनं, जग्लिः मम्लिः दधिः ददिः पोपः ललिः ररिः जगिः इति जातं इकारान्तं, ७-१ ङेरौर्डित्' (३-२-२१) जग्लौ मम्लौ दधौ ददौ पपौ ललौ ररौ जगौ, एवं जग्लिमम्लिपपिदधिददिशब्देषु सम्बोधने 'धा' विति (३-२-१८) सूत्रेण एकारे कृते जग्ले मम्ले पपे इत्यादयः प्रयोगाः स्युः । 'सृ गतौ' सृ, सरति स्म'आदृतः किर्द्विश्चे ति ( ८-२-३१ ) किः, ककारः कित्कार्यार्थः, इप्रत्ययः, द्विर्त्वं, सृ सृ इति स्थिते 'र' ( ७-४-२८ ) इति पूर्व ऋकारस्य अत्वं, 'ऋ र' मिति (२-१-३) रत्वं सस्रिः, इकारान्तत्त्वे 'समानाद्धेर्लोपोऽधातो' रिति ( ३-१-६ ) धेर्लोपे 'धा' विति (३-२-१८) एत्त्वे सस्रे इति सिद्धं । 'जनी प्रादुर्भावे' ईकार 'आदीदित' इति सूत्रविशेषणार्थः, जन् , 'आदृतः किर्द्विश्चे' ति चकारादुपधालोपिन इति क्षेमेन्द्रोक्तेः चकाराद्गमिजनिहनिभ्यः किरिति **मण्डन**व्याख्यातश्च किप्रत्ययः, द्वित्त्वं, ज जन् इ इति स्थिते 'गमां स्वर' ( ७-४-६८ ) इत्युपधोलापे, स्वरहीनं, जज्ञि, पश्चादिकारान्तत्त्वेन हरिशब्दवत् सम्बोधने जज्ञे इति सिद्धं, एवं जग्मे जघ्ने इत्यादयोऽपि साध्याः । ( जगाम न गमे रूपं ) 'कै गै रै शब्दे' सन्ध्यक्षराणामाः, गा, गायतीत्येवंशीलः 'आदृतः कि' रिति किप्रत्ययः, द्विश्च, 'कुहोश्चु' रिति ( ७-४-२६ ) गस्य कः,

For Private and Personal Use Only

'आतोऽनपी' (७-४-६९) त्याकारलोपे जागिः, जंगिमाचष्टे 'ञिर्डित्करणे' इति (७-४-६) ञिप्रत्यये जगयति, जगयतीति क्विप् लोपः जग्, जग् इवाचरति 'कर्तुर्यङ्ङि' ति (७-४-५) यङ्, यङ् लोपः, तुवादिः आम जगाम इति रूपमनुक्तमपि प्रसङ्गादिह लिखितम्॥

**अधीये नोपसृष्टस्य, शक्यतीत्यस्य साधुता । जागर्त्तीति न जागर्त्तेरुच्यतीति[2] च साधुता ॥ ११ ॥**

'अधीये' इत्यादि, अधीये इति रूपं उपसृष्टस्य-उपसर्गसहितस्य 'इङ् अध्ययने' इ इङिकावध्युपसर्गतो न व्यभिचरतः इति सदा अधिपूर्वः, वर्त्तमाने ए, 'नुधातो' रिति ( ३-४-२१ ) इय् स्वर० अधीये, किन्त्वन्यथा साध्यते, 'धीङ् अनादरे' धी, अनद्यतने इ, दिबादावट्, 'दिबादेर्यः' ( ७-१-१५ ) 'अइ ए' ( २-१-१५ ) अधीये, यद्वा 'डुधाञ् धारणपोषणयो' रित्यस्य धातोर्यकि प्रत्यये इ परे रूपं सिद्धम्। 'शकॢ शक्तौ' इति धातोर्यकि प्रत्यये कृते शक्यते इति भाव्यम्, 'शक मर्षणे' शक्, वर्त्तमाने तिप्प्रत्ययः दिवादेर्य इति यः, शक्यति, यद्वा शक्य इवाचरति कर्त्तुर्यङिति यङ्, लोपः, वर्त्तमाने तिप्, अप् कर्त्तरि इत्यप्, अदादेर्लुक्, शक्यति रूपं सिद्धं। जागर्तीति 'जागृ निद्राक्षये' इत्यस्य प्रसिद्धं, तत्र नेदमस्येति पृच्छ्यते, 'गॄ निगरणे' गर्हितं गिरति 'अतिशये हसादे' रिति ( ७-३-५७ ) यङ्, 'वाऽन्यत्रे' ति ( ८-२-२७ ) यङ् लुक्, 'ह्वादिवच्च द्रष्टव्य' मित्युक्तत्त्वाद् द्वित्वं, 'र' इत्यकारः, 'कुहोश्चु' रिति ( ७-४-२६ ) गस्य जः 'आत' इति ( ७-४-३५ ) दीर्घः, ऋकारान्तत्त्वान्न ऋगादयः, गुणः, जागर्त्ति । 'वच परिभाषणे' वच्, यक्, संप्रसारणे उच्यते इति भाव्यम्, साधुत्त्वं तु 'उच समवाये' उच्, वर्त्तमाने तिप्, दिवादेर्य इति य प्रत्यये सिद्धं उच्यति ॥ ११ ॥



१-जगिश्छान्दस इति हैमः २-त्यस्येतिद्विः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





**अस्यन्निति न शत्रन्तं, व्याघ्रा इत्यस्य चैकधा । बहुत्त्वं च तथैतेषामसुर्मेषारुरेव च ॥ १२ ॥**

'अस्यन्निति' शत्रन्तं इति तावत् 'असु क्षेपणे' अस् अस्यतीति 'शतृशाना' विति (८-२-१७) शतृप्रत्ययः, दिवादेर्यः, अस्यन्, अशत्रन्तं तु 'षोऽन्तकर्म्मणि' षो, 'आदेः ष्णः स्नः' सो, दिवादिस्थः अन् प्रत्ययः, दिवादावट्, 'दिवादेर्यः' ( ७-१-१५ ) 'य्वो'-रिति ( ७-४-७२ ) ओकारलोपः, 'अदे' ( ७-३-१४ ) इत्यलोपः अस्यन् सिद्धं । व्याघ्रा इति जसन्तं प्रसिद्धम्, एकत्त्वं पुनरित्थं-'घ्रा गन्धोपादाने' घ्रा, दिवादि स्, भूते सिः, दिवादावट्, विआङ्पूर्वः 'घ्रासाच्छाशाधेटा' मिति सिलोपः, स्रो० व्याघ्राः सिद्धं । तथा एतेषां वक्ष्यमाणानां बहुत्त्वम्, असुः इति, असुशब्दः प्राणवाचकः १–१, बहुत्वं तु 'षोऽन्तकर्म्मणि' षो, दिवादि अन्, 'आदेः ष्णः स्नः', सो, 'भूते सिः' 'घ्रासाच्छाशाधेटा' मिति सिलोपः, 'स्याविद' (७-३-२१) इत्यन उस्, 'उस्यालोप' (७-३-३३) इत्यालोपः, स्वरहीनं, स्रो०, असुरिति सिद्धं, मेषेति मेषशब्दात् सम्बुद्धौ एकत्वं प्रसिद्धं, बहुत्त्वं तु 'कष शष जष झषे' त्यादि, मष हिंसायां मष्, परोक्षे अग्रे अ, द्विश्च 'लोपः पचां किस्ये चास्ये' ति पूर्वलोपः एकारः, मेष सिद्धम् । अरुष् शब्दो मर्मवाची, 'दोषां रः' १–१, बहुत्त्वं तु 'रा दाने' रा, अनद्यतने अन् प्रत्ययः, अप्, 'अदादेर्लुगि' (७-१-१३) त्यपो लुक्, 'स्याविद' (७-३-२१) इत्यन उस्, उस्यालोपः, स्रो०, अरुः सिद्धम् ॥१२॥ **पुनः समुच्चयाच्चस्य, शसन्तं पर्वतास्त्विवाति । आगमोऽनुजगृहे राजसे हरहरेऽव्ययम् ॥१॥** चकारस्यानुक्तसमुच्चयार्थत्त्वात् पर्वत इति द्वितीयाबहुवचनान्तं, पर्व धातोः शतृप्रत्यये पर्वत्शब्दात् २-३ पर्वतः, 'गम्लृ गतौ' गम्, आङ्पूर्वः दिवादि स्, 'लित्पुषादेर्ङ' (७-२-१५) इति अप्रत्ययः, दिवादावट्, स्रो० 'गमां स्वरे' (७-४-६८) इत्यत्र न ङे



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





इति वक्तव्यं, तेनाऽऽगमदित्यत्रालोपाभावः इति क्षेमेन्द्रवचनात् आगमः सिद्धम् । अनुजातः अनुजस्तस्य गृहमनुजगृहं ततः ७-१ स्याद्यन्तं, त्याद्यन्तं कथं ?, 'ग्रह उपादाने' ग्रह्, णबादि ए द्विश्च 'णबादौ पूर्वस्येति' ( ८-४-३२ ) सम्प्रसारणं, रस्य ऋकारः, 'र' इत्यः 'कुहोश्चुः' ( ७-४-२६ ) 'ग्रहाङ्किति चे' ति ( ८-४-३१ ) द्वितीयसम्प्रसारणं, अनुपूर्वः अनुजगृहे सिद्धं । सह इना वर्त्तते इति सेः, राज्ञः सेः संबुद्धौ इति स्याद्यन्तं, त्याद्यन्तं तु 'राजृ दीप्त्या' मिति धातोः सेप्रत्यये अपि राजसे सिद्धम् । 'हृञ् हरणे' तुबादि हौ अप्प्रत्यये गुणे 'अत' इति ( ७-३-१३ ) हेर्लुकि सिद्धं हर, अस्यैव धातोरुभयपदित्वाद्वर्त्तमाने एप्रत्यये हरे रूपं साधु, अव्ययमिति ' व्येञ् संवरणे ' इत्यस्य दिवाद्यमिप्प्रत्यये अपि दिवादावडित्यटि, अयि व्यय गतावित्यस्य वा रूपम् ॥

**एतानि न स्याद्यन्तानि, यस्य तस्याश्वमस्य च । शेलुर्बिभीतको वेणुः, पञ्चैते स्म ऋणानि च ॥ १३ ॥**

'एतानी' ति, यस्येत्यादीनि स्याद्यन्तत्त्वेन प्रसिद्धानि, तानि त्याद्यन्तानि कथमिति प्रश्नः, तत्र 'यस्ये' ति 'यस् प्रयत्ने' हौ दिवादेर्य इति यप्रत्यये हेर्लुकि सिद्धम् । एवं 'तस क्षये' तस्य 'अस् क्षेपणे' इत्यस्य अस्य रूपं, यथा पूर्वं 'ओश्वि गतिवृद्ध्यो' रिति धातोः अश्व इति रूपं निष्पादितं तथा अमि प्रत्यये अश्वमिति सिद्धम् । शेलुः श्लेष्मातक इत्याभिधानात् १-१ स्याद्यन्तं, त्याद्यन्तं तु 'पल फल शल गतौ' शल्, यथा पेचुः तथा शेलुः सिद्ध्यति । बिभीतकः-प्रतीतः, त्याद्यन्तं तु 'ञिभी भये' भी, वर्त्त० तस्, अप्कर्त्तरीत्यप्, 'ह्वादेर्द्विश्च' 'झपानां जबचपाः' 'ह्रस्वः' बिभीतः, 'अव्ययसर्वनाम्ना' मिति सूत्रे चकारादाख्यातेऽप्यक् । 'अण रण वण व्रण गतौ' वण् वा 'वण शब्दे' इत्यस्य वेणुरिति प्रयोगो न भवति, बकारादीनां पूर्वलोपादेर्निषेधात्, तस्माद् रेणुरिति पाठो



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





द्रष्टव्यः, रण शब्दे, साधना शेलुवत्, वेणुरित्याह च हेमसूरिः, पञ्च इतः-प्राप्तः पञ्चाभिः पञ्चभ्य इतः-प्राप्तः तस्मिन् पञ्चेते इति स्याद्यन्तं, त्याद्यन्तं तु 'पचि व्यक्तीकरणे' पच्, वर्त्तमाने आते, अप् प्रत्ययः, 'इदित' इति ( ७-४-९६ ) नुम् 'आदाथ इः' (७-३-१६) पञ्चेते सिद्धं। स्म इति अतीतद्योतकः, स्मेति निपाति ह्रस्वः णत्वं ऋणानि सिद्धम्[1] (?)॥१३॥ चस्य समुच्चयार्थत्त्वात्-समुच्चयात्पुनश्चस्य, प्रयोगास्त्यादिजा अमी। अस्यास्तस्याश्च यस्याश्च, कस्या इति चतुष्टयी ॥ १ ॥ 'अस् क्षेपणे' 'यस मोक्षणे' 'तस क्षये' 'कस गतिशातनयोः' कस्, आशिषि यास्, स्वरहीनं, अस्याः तस्याः यस्याः कस्याः इति रूपाणि स्युः।

**एकस्य कस्य धातोः स्यात्त्यादौ रूपचतुष्टयम्। पर्वाणि पर्वतं पर्व पर्वतोऽपूर्वमेव च ॥ १४ ॥**

'एकस्ये' ति कस्यैकस्य धातोः त्यादौ स्याद्यन्तप्रतिरूपकं रूपचतुष्टयं भवतीति प्रश्नार्थः, 'पूर्व पर्व सर्व पूरणे' पर्व, परतः आनि तस् हि तुबादि तं प्रत्ययः, सर्वत्राप्प्रत्यये पर्वाणि पर्वतः पर्व पर्वतमिति रूपचतुष्टयं, पूर्वधातोर्दिवाद्यम्प्रत्ययेऽपि अटि 'अदे' अपूर्वं सिद्धम् ॥ १४ ॥

**चस्य समुच्चयार्थत्वात् । जलानि वातो वातं च, वातः प्रातस्तथैवहि । श्यामाऽध्यायोऽनलश्चाप्यक्षरं चस्य समुच्चयात् ॥ १ ॥** 'जल धान्ये' जल, आनिपि अपि जलानि। वा गतिगन्धनयोः वा, अत्र तस् तुबादि तं त, अप् 'अदादेर्लुक्' वातः वातं वात इति३रूपाणि। 'प्रा पालनपूरणयो' प्रा, वर्त्तमाने तसि अपि अदादेर्लुक् प्रातः। 'श्यैञ् गतौ, श्ये, वर्त्तमाने मस्,'

[1] तुबादिमप्रत्यये ' अस् भुवि ' इत्यस्य स्मेति। 'ऋशृगतौ' क्र्यादौ ल्वादौ आनिपि णत्वे ह्रस्वेऋणानि.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सन्ध्यक्षराणामाः,अप्, अदादेर्लुक्, श्यामः,यद्वा'शो तनूकरणे' इत्यस्य मसि रूपं । 'ध्यै चिन्तायां'ध्यै, दिवादिस्, अप्कर्तरीत्यप्, अडागमः, ऐ आय् अध्यायः । 'णल गन्धे'आदेःष्णः'नल्, अनद्यतने स्, अप् अट्, अनलः। 'क्षर सञ्चलने' क्षर,, अनद्यतने अम्, दिवादावट्, अक्षरमिति'। इति समुच्चयरूपाणि भवन्ति ॥ **वेम नेम मम स्यामो, दाम विश्राम वाम च । बहुत्वं कथमेषां स्यादेकत्वं भवतामपि ॥ १ ॥ आदिदेवेत्यसम्बुद्धिः, पाथ इत्यनपुंसकम् । अजागाः कथमेकत्वं, कथं सिद्ध्येत्तथा मधुक् ॥ २ ॥** इदं श्लोकद्वयमवचूरिकृता कृतमस्ति प्रसङ्गतः ।

**अशोकोऽनौस्तथा वाताद्श्रीणामरुणोऽवनम् । वनानि स्वोऽखिलं यानि, शुभानि च रणानि च ॥ १५ ॥**

'अशोक०' इति स्याद्यन्ताः प्रायः सुगमा एवेति त्याद्यन्ता एव दर्श्यन्ते, 'शुक गतौ' शुक्, अनद्यतने स्, दिवादावट्, अप् कर्त्तरीत्यप्, उपधाया लघोरिति गुणः, स्रो०, अशोकः सिद्धं । न नौरिति अनौः-तरेरन्यत् इति स्याद्यन्तं, त्याद्यन्तं तु 'णु स्तुतौ' णु 'आदेः ष्णः स्नः' नु, अनद्यतने स्, दिवादावट्, 'ओरा' ( ७-४-८२ ) वित्यौकारः, अनौः सिद्धं । 'वा गतिगन्धनयोः' वा, तुप् अप् अदादेर्लुक्, 'तुह्योस्तातङाङि' ति तात् हेरपि वातात् । 'श्रीञ् पाके' श्री, दिवादि अम्, 'ना क्र्यादेः' दिवादावट्, सवर्णे दीर्घः सह, णत्वं प्वादिष्वपाठान्न ह्रस्वत्त्वं, नाप्रत्ययस्य ङित्त्वाद् गुणाभावः, अश्रीणामिति सिद्धम् । अरुणः सूर्यस्य सारथिः वर्ण-विशेषो वा, त्याद्यन्तं तु 'रुधिर् आवरणे' रुध्, 'रुधादेर्नम्' ( ७-१-१७ ) दिवादावट्, णत्वं, 'दिस्योर्हसा' दिति ( ७-३-३ ) स् लोपः, 'वाऽवसाने' ( ४-२-२७ ) इति धस्य दत्त्वे, 'दः स' ( ४-४-२४ ) इति सत्वं, अरुणः । 'वन षण संभक्तौ' वन् भौवादिकः,



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





दिवादि अम्, अप्, अवनम्, एवमानिप्प्रत्यये वनानि सिद्ध्यति, यद्वा 'अन प्राणने' वनपूर्वः वनमनिति स्मोति' णिनिरतीते' (८-२-११) इति इन्, वनानि १-१, 'नपुंसकात् स्यमोर्लुगि' ति लुक्। 'अस भुवि' इति धातोर्वसि प्रत्यये 'नमसोऽस्ये' (७-३-२६)-त्यलोपे स्वः इति सिद्धम्। खिलमिवाचरं 'कर्तुर्यङ्डि' ति क्विप् लोपः, अनद्यतनेऽम्, अप् लुक् अखिलं सिद्धं। 'या प्रापणे' इत्यस्य आनिपि यानिरूपं । 'शुभ शुंभ् शोभार्थे' शुभ तुदादिः, 'रण शब्दे' रण् भुवादिः, आनिपि परे शुभानि रणानि सिद्धम् ॥ १५ ॥

उपलक्षणतो लोके, इति रूपस्य विभ्रमे । कुण्डे पिण्डे तथा मुण्डे, मुण्डे चण्डे च खण्डके ॥ १ ॥ 'कुडि दाहे' कुड्, 'पिडि सङ्घाते' पिड् 'मुडि मज्जने उद्यमे वा' मुड्, चडि कोपे चड् 'खडि मन्थने' खड्, सर्वत्र वर्त्तमाने ए प्रत्ययः, 'इदित' (७-४-९६) इति नुम्, कुण्डे पिण्डे इत्यादिरूपाणि स्युः, एतानि सप्तम्येकवचनप्रातिरूपकाणि प्रथमाद्वितीयाद्विवचनसदृशानि वा ।

**सास्नाया अकृशोऽताता, अममा अवटोऽनृणाम् । रेफ वेष रवेऽपेपेरदोधूर्तानिलः कुतः ॥ १६ ॥**

'सास्नाया' इति, इहापि प्रायः स्याद्यन्तप्रतिरूपकाः, सास्नाशब्दस्य षष्ठ्येकवचनान्तस्यादौ रूपं, क्रिया तु 'ष्णा शौचे' 'आदेः ष्णः स्नः' ( ७-४-७७ ) स्ना, अत्यर्थं स्नाति, 'अतिशये हसादे' ( ७-३-५७ ) रिति यङ्, यङो लोपे द्विर्वचनं 'पूर्वस्य हसादिः शेष' इति ( ७-४-२४ ) नस्य लोपे आशीर्यास्प्रत्ययः, सास्नायाः सिद्धं । 'कृश तनूकरणे' कृश्, अनद्यतने स्, दिवादावद् 'लित्पुषादे' (७-२-१५)रित्यप्रत्ययः, स्वर० अकृशः इति सिद्धम्। नास्ति तातो येषां तेऽताताः १-३ स्याद्यन्ते, क्रिया तु 'तर्द हिंसायां' तर्द, अत्यर्थं तर्दति यङ्, यङ् लुक्, द्विश्च, अनद्यतने स्, अद्, सौ पदान्ते रेफप्रकृत्त्योरपि दधो रत्वं, 'आत' इति (७-४-३५) पूर्वस्य ॥ ४३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





दीर्घत्वे 'दिस्योर्हसादि' ति स्लोपः, 'रिलोपो दीर्घश्चे' ति (२-४-१२) रलोपः, अताताः, अथवा 'तनूकरणे तन्' अत्यर्थं तनोति 'तनोतेर्नो वा' इति ( तनोतेर्वा ७-४-७५ ) नस्यात्त्वं, शेषं प्राग्वत्। न विद्यते मर्म यासां ता इति विग्रहे 'टाडका' इति (६-३-१५) डप्रत्यये 'आबतः स्त्रिया' (६-२-१) मित्यापि अमर्म्माः १-३ रूपं, क्रिया तु 'मृद क्षोदे' मृद्, अत्यर्थं मृद्नाति यङ् लुक् द्विश्च रः 'ऋदुपधाना (रीगृ उपधायाः७-४-३७)' मिति ऋगागमः, अनद्यतने स् गुणः अर्, दकारस्य रत्वे 'दिस्योर्हसादि' ति सिपि लुप्ते 'रि लोपो दीर्घश्चे' ति अमर्मा इति सिद्धं । 'वट वेष्टने' वट्, अनद्यतने स् दिबादावट् अप् कर्त्तरीत्यप्, स्त्रो०, अवटः सिद्धं, 'वट परिभाषणे' इत्यस्य वा रूपं, अन्यथा तु 'अवटो गर्त्तः' । 'अनृणा' मिति, 'नृञ् नये' नृ, अनद्यतने अम्, 'ना ऋयादेः' ( ७-१-२० ) 'प्वादेर्ह्रस्वः' ( ७-४-९३ ) णत्वं, सवर्णे०, अट् अनृणामिति सिद्धम्, नृशब्दः नञ्पूर्वः न नरोऽनरस्तेषामिति स्याद्यन्तं । 'वर्फ रफ रिफ गतौ' रफ्, परोक्षेऽप्रत्ययः, द्विश्च, 'लोपः पचां कित्ये चास्ये' ( ७-४-४५ ) ति पूर्वलोपः अकारस्यैकहसस्यैकारः, स्वर० रेफ सिद्धं । 'जिष् विष् मिष् निष् पृष् वृष् सेचने' विष्, तुदादि हिः, 'अप्कर्त्तरी' त्यप् 'उपधाया लघो' रिति ( ७-४-६० ) गुणः, 'अत' इति ( ७-३-१३ ) हेर्लुक्, स्व०, वेष सिद्धं । केचित्तु 'वष हिंसाया' मित्यस्य णादिमध्यमपुरुषबहुत्वे वेषेत्याहुः, तदसत्, लोपः षचां कित्ये चास्येति सूत्रे चकाराद्वकारादित्वादेत्त्वपूर्वलोपयोरसम्भवात् । रविशब्दादामन्त्रणे सौ, यद्वा रवशब्दस्य सप्तम्येकवचनान्तस्य स्याद्यन्तता, क्रिया तु 'रुङ् रोषणे' रु, वर्त्त० ए, 'अप्कर्त्तरी' त्यप्, गुणः, 'अदे' ( ७-३-१४ ) इत्यलोपः, अइ ए, रवे सिद्धं । 'पि गतौ' पि इत्यस्माद्यङि लुकि द्वित्वे 'यङी' ति ( ७-४-३४ ) पूर्वस्य गुणे गुण इति परस्य गुणे दिबादिसिप्प्रत्यये स्रोर्वि० अपेपेः, यद्वा 'पिसृ पेसृ वेसृ गतौ' पिस्, अत्यर्थं पेसति 'अतिशये हसादे' रिति यङ् 'वाऽन्यत्रे' ति यङ्लुकि



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





दिबादिसिप्, दिबादावट्, गुणः, 'दिस्योर्हसादि' ति सिप्लोपः 'स्रोर्विः' अपेपेरिति सिद्धम्। 'उर्वै तुर्वै थुर्वै दुर्वै धुर्वै जुर्वै अर्व भर्व शर्व हिंसायां' धुर्व्, ऐकार ऐदित्कार्यार्थः, अत्यर्थं धूर्वति 'अतिशये हसादे' रिति (७-३-५७) यङ् लुक् द्वित्वं 'झपानां जबच-(बाश्च) पा' इति (७-४-२७) पूर्वधस्य दः, 'यङी' ति (७-४-३४) पूर्वनामिनो गुणः, 'लोपो व्योर्वस' इति क्षेमेन्द्रकृतवृत्ति-सूत्रेण वकारलोपः, दो धुर् इति स्थिते दिबादितप्रत्ययः, दिबादावट् इत्यट्, 'यूवोर्विहसे' (७-४-१३) इति दीर्घत्वे रेफस्योर्ध्वग-मने द्वित्वे अदोधूर्त्त सिद्धं। अनिल इति 'णिल गहने' णिल्, तुदादिः, 'आदेः ष्णः स्नः' इति नत्वे दिबादिसिप्प्रत्यये 'तुदादेर' (७-१-१९) इत्यप्रत्ययेऽनिलः । कुत इति 'टु क्षु रु कुक् शब्दे' ककारः परस्मैपदार्थः, वर्त्त० तस्, अप्, अदादेर्लुगित्यपि लुकि कुतः सिद्धम्, स्याद्यन्तता सुगमेति न लिखिता ॥ १६ ॥

|| ४५ ||

**अरये नभसे पयसे वयसे लोके नसे गवे वृक्षे। अह्वयोऽक्रवेऽयसे लेखे रेखे रजसि रेजेऽलिट् ॥ १७ ॥**

'अरये' इत्यादि, स्याद्यन्ताः सुगमाः, क्रियारूपे तु साधनां ब्रूमः, 'अय वय पय मय नय रय गतौ' भ्वादिः रय्, दिबादि-इप्रत्ययः, अप्कर्त्तरीत्यप्, दिबादावट्, अइ ए अरये। 'णुभ णभ हिंसायां' णभ्, आदेः ष्णः स्नः, नभ्, वर्त्त० सेऽप् नभसे। 'अय वय पय मय गतौ' पय् वय्, नभसेवत् साधना, पयसे वयसे। 'लोकृ दर्शने' लोक्, वर्त्त० ए, अप्, अदे, अइए, लोके। 'णस् कौटिल्ये शब्दे वा' णस्, आदेः ष्णः स्नः, नस्, वर्त्तमाने ए, 'अप् कर्त्तरी'त्यपि नसे, नासिकाशब्दस्य चतुर्थ्येकवचने नसादेशे, यद्वा शकट-पर्याये अनस्शब्दे चतुर्थ्येकवचनान्ते ज्ञेयं स्याद्यन्तं। उङ् कुङ् घुङ् गुङ् घुङ् शब्दे, गु वर्त्तमाने ए, अप्, गुणः, ओ अव्, गवे सिद्धं।

|| ४५ ||

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





'वृक्ष वरणे' वृक्ष्, वर्त्तमाने ए, अप्, वृक्षे, यद्वा अनयोरेव धात्वोः अनद्यतने इप्रत्यये अगवे अवृक्षे सिद्धं। अहय इति, हयशब्दान्नञ्पूर्वात् १-१ अहिशब्दाद्वा जसि, क्रिया तु 'हय गतौ' ( क्रान्तौ वा ) हय्, अनद्यतने सि, अप्, दिबादावट्, स्रो०, अहयः सिद्धं। 'उङ् कुङ्' कु, वर्त्तमाने इप्रत्यये (नञि) सिद्धं, त्याद्यन्तं, स्याद्यन्तं तु न कविः अकविस्तस्यामन्त्रणे, नञ्पूर्वात् कुशब्दाच्चतुर्थ्यां वा अकवे इति ज्ञेयम्। अयसे इति लोहवाची चतुर्थ्यन्तः, क्रिया तु 'अय गतौ' अय्, वर्त० से, अप्, अयसे सिद्धम्। 'उख नख णख० गतौ' 'लख् रख्' परोक्षे एप्रत्ययः, द्विश्च 'लोपः पचा'मितिपूर्वलोपः एकारश्च लेखे रेखे सिद्धं। रजसि इति पांशुरेणुः ७-१, क्रिया तु 'रंज रागे' रंज्, वर्त्त० सि, अप्, 'अपि रांजिदंशे'(?) ति नलोपः, स्वर० रजसि सिद्धं। 'रेजे अलिडि'ति लिट् इति परोक्षप्रत्ययानां संज्ञा पाणिनीयानां, परोक्षप्रत्ययं विना रेजे इति व्युत्पादनीयं, परोक्षे त्वेवं-'राजृ दीप्तौ' राज्, परतः णबाद्यात्मनेपदे ए द्विश्चेति द्वित्वं, रराज् ए इति स्थिते 'लोपः पचां कित्ये चास्ये' ( ७-४-४५ ) ति सूत्रस्थचकारात् पूर्वस्य रस्य लोपः अकारस्य एकारः, स्वरहीनं, रेजे इति सिद्धम् परोक्षं विना रेजे इति कथं सिद्ध्यतीति प्रश्नः, इहोत्तरं-'रेजृ दीप्तौ रेज्, ऋकार इत्, भुवादिः, तिबाद्यात्मनेपदोत्तमपुरुषैकवचनं ए, अप्कर्त्तरीत्यप्, अदे इत्यलोपः, यद्वा 'ऋजि गतिस्थानार्जनेषु' अमुं कश्चिद् व्यञ्जनादिं पठति, तन्मतमाश्रित्य प्रयोगोऽयं रिज्, गुणकृतस्तु विशेषः, शेषं प्राग्वत्, रेजे इति सिद्धम् ॥ १७ ॥

**अद्यौर्न नञ्समासोऽयं, सर्वेषामिति चैकता। अन्येषामपरेषां च, केषां कासां तथा दश ॥ १८ ॥**

'अद्यौ' रिति न द्यौरद्यौरिति नञ्समासः, प्रतिपक्षस्तु 'द्यु अभिगमने' द्यु, अन० सि दिबादावट् 'ओरा' ( ७-४-८२ ) वि-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्यौकारः, स्रो०, अद्यौः सिद्धं। सर्वेषामिति, सर्वा चासौ ईषा च सर्वेषा ताम् २-१, 'ईषा सीते तद्दण्डपद्धती' इतिहैमाभिधाने। अन्येषां अपरेषां च सर्वेषांवत् ज्ञेयौ। कस्य ईषा केषा तां २-१। कासामिति 'कासृ शब्दकुत्सायां' कास्, कासनं कासा, गुरोर्हसादि'(८-४-२०)-त्यप्रत्ययः, 'आबतः स्त्रिया' ( ६-२-१ ) मित्याप्, २-१। 'दंश दंशने' दंश, तुदादि हिः, अप्, 'अपि रंजिदंशे' ति नलोपः, 'अत' इति हेर्लुकि दश इति सिद्धिः । एते एकवचनान्तत्वाद्विभ्रमविषयाः, चस्य समुच्चयार्थत्वं दर्श्यते—**समुच्चयाच्चकारस्य, चक्र सम्बोधनं विना । अवस्था इति शब्दोऽपि, स्यादेकवचनः कथम् ?, ॥ १ ॥** तेन चक्र इति आमन्त्रणैकवचनान्तप्रतिरूपकम्, बहुवचनान्तं तु वच्मः-'डुकृञ् करणे' कृ, परोक्षे अ, द्विश्च, रः, 'कुहोश्चुः' (७-४-२६) 'ऋ र'मिति रत्त्वे चक्रेति सिद्धम्। 'वस आच्छादने' वस्, अनद्यतने थास्, दिबादावट्, अप्, अदादेर्लुगित्यपो लुक्, स्वर०, स्रोः. अवस्थाः ॥ १८ ॥

**अगारं द्वे पदे स्यातां, प्रथमान्तं शुनस्तथा । कर्तृरूपे कथं स्यातां, दीयते धीयते तथा ? ॥ १९ ॥**

अगारमिति गृहवाचि एकं पदं, द्वे पदे तु 'अग कुटिलायां गतौ' अग्, तुबा० हि, अप्, अतः, स्वर०, अग सिद्धं । 'ऋ गतौ' ऋ, अद्य० अम्, 'लित्पुषादे' (७-२-१५) रित्त्यप्रत्यये गुणे अटि आरं, अगारं सिद्धं, यद्वा 'इण गता' विति धातोर्दिबादिसिपि भूते सिरिति सौ 'दादेः पे' (७-३-१०) इणः सिलोपे गा इति कृते अटि अगाः, रमिति 'रः कामे तीक्ष्णे वैश्वानरे नरे । रामे वज्रे' इत्येकाक्षरोक्तेः रशब्दात् २-१, यद्वा अगशब्दात् सम्बुद्धौ अरमित्यत्यर्थं अगारमिति । शुनशब्दात्प्रथमैकवचने स्रो०, यद्वा 'शुन गता' वित्यस्य शुनतीति 'नाम्युपधात्क' ( ८-१-५ ) इति के १-१ शुनः । 'डुदाञ् दाने' 'दाप् दाने' 'दो अवखण्डने' 'देङ्



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पालने' इत्येतेषां चतुर्णां तेप्रत्यये भावकर्म्मणोर्यकि 'दादेरि' ( ७-४-१५ ) रितीत्त्वे दीयते इति स्यात्, 'धेट् पाने' 'डुधाञ् धारणपोषणयो' रनयोर्भावकर्म्मणोर्यकि धीयते इति भवति, तत्र कर्त्तरि कथं स्यातामिति प्रश्नः, 'दीङ् क्षये' 'दी धीङ् अनादरे' धी, वर्च० ते, 'दिवादेर्य' ( ७-१-१५ ) इति यप्रत्यये दीयते धीयते ॥ १९ ॥

**त्याद्यन्तमालयं प्रोक्तमसमस्तमजापयः । अन्यान्योऽनालयश्चैव, ह्यश्वालयमशालयः ॥ २० ॥**

'त्याद्यन्त' मिति, आलयशब्दो गृहवाची पुल्लिङ्गः,द्वितीयैकवचने आलयं इति स्याद्यन्तं, त्याद्यन्तं पुनरेवं 'अली भूषणपर्याप्तिवारणेषु' अल्,अलन्तं प्रयुंक्ते 'धातोः प्रेरणे' (७-४-८) इति ञिप्रत्ययः, ञित्त्वाद् वृद्धिः, आलि इति स्थिते परतो अन० अम्, 'अप् कर्त्तरी' त्यप् गुणायादेशौ, अटि, स्वर०, सवर्णे, आलयं सिद्धं । अजायाः पयोऽजापय इति षष्ठीसमासे प्रसिद्धमेतद्, असमस्तं तु कथमिति प्रश्नः, तत्र 'जप मानसे च' मनोनिर्वर्त्त्ये वचने इत्यर्थः, चाद् व्यक्ते वचने जप्, जपन्तं प्रेरयति 'धातोः प्रेरण' (७-४-८) इति ञिः, वृद्धिः, जापि, अन०स्, अप्, गुणे अयादेशे दिबादावडित्यटि स्व०स्रो० अजापयः, यद्वा 'जि अभिभवे' जिधातोः प्रेरणे ञिः, जयन्तं प्रयुंक्ते, 'इङादेर्जौ पुगि'ति पुक्, इकारस्य आ, जापि, शेषं प्राग्वत्, अजापयः सिद्धं । 'णीञ् प्रापणे' णी, नी, नञ्पूर्वः न नी अनी अन्याश्च ता अन्यश्चान्यान्यः १-३ प्रथमाबहुवचने सवर्णे० स्रो० । अश्वालयमिति अश्वानामालयः अश्वालयस्तमिति समासपदं, असमासे तु 'श्वल श्वल्ल गतौ' श्वल्, श्वलन्तं प्रेरयति धातोः प्रे० ञिप्र० वृद्धिः, श्वालि अन०अम् अपि गुणे अयादेशे अश्वालयमिति सिद्धं । चैव हीति छन्दःपूरणे निपातः । 'णल गन्धे' णल्, नलन्तं प्रयुंक्ते प्रेरणे ञिः वृद्धिः नालि अनद्य०



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स् अपि गुणे अपि स्वर० स्रोर्वि० अनालयः । 'शल चलने वा' 'शाल कत्थने वा' 'पल फल शल गतौ' शल्, शलन्तं प्रेरयति अनालयवत् साध्यं अशालयः, ॥ "अजिनान्यधिक्षताधुक्षतेत्त्याद्यपराण्यपि। शेषे च देवता देवतामित्यादि चकारतः ॥१॥" अजिनानि 'ज्या वयोहानौ' ज्या क्रयादिः, आनिप् 'ना क्रयादे' रिति नाप्रत्ययः, 'ग्रहाङ्किति चे' (८-४-३१) संप्रसारणं यकारस्य इकारः, दीर्घस्य दीर्घः जी 'प्वादेर्ह्रस्व' इति जि नञ्पूर्वः, न जिनानि अजिनानि सिद्धं । 'धिक्ष धुक्ष सन्दीपनक्लेशनयाचनेषु' धिक्ष् धुक्ष्, अनद्य० तप्र० दिवादावद्, अप्कर्तरीत्यप्, स्वर० अधिक्षत अधुक्षत सिद्धं, यद्वा 'दिह उपचये' दिह्, 'दुह प्रपूरणे' दुह् अन० तन् प्र०, 'हशषान्तात् सगि (७-२-१३) ति सक् प्रत्ययः 'दादेर्घः' (४-४-१५) 'आदिजबानां झभान्तस्ये' ति (४-४-२८) दस्य धः, 'खसे चपा झसाना' मिति ( ४-४-२५ ) घस्य कः, कषसंयोगे क्षः अधिक्षत अधुक्षत । 'शीङ् स्वप्न' इत्यस्यात्मनेपदिनः वर्त्तमाने मध्यमपुरुषैकवचने शेषे । 'देवृङ् देवने' देव्, वर्त्त० ते, तुबादि तां, अप् , देवते देवतां सिद्धम् ॥ २० ॥

**अव्याधयोऽसमस्तं स्यात्, येयेषांचक्रिरे पदम्। अक्षेपयस्तथा चान्यदक्षेवयममीवयम् ॥ २१ ॥**

**॥ इति कातन्त्रविभ्रमसूत्रं सम्पूर्णम् ॥**

'अव्याधय' इति, न विद्यते व्याधिर्येषां ते अव्याधयः इति समस्तम्, असमस्तं तु 'व्यध ताडने' व्यध्, विध्यति कश्चित्तमन्यः प्रयुङ्क्ते 'धातोः प्रेरणे' ञिः, वृद्धिः, व्याधि, अनद्य०स् शेषं अशालयवत् साध्यम् अव्याधयः । येयेषांचक्रिरे इति पदत्रयसदृशमेकं पदं कथं स्यादिति साध्यते, 'येषृङ् प्रयत्ने' येष्, अत्यर्थं येषते 'अतिशये हसादे' रिति ( ७-३-५७ ) यङ् द्वित्वं येयेष



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'कासादिप्रत्ययादाम् कसभूपर' इत्याम् प्रत्ययः, चक्रिरे 'डुकृञ् करणे' इति धातोः परोक्षे इरे प्र०, येयेषांचाक्रिरे पदं सिद्धं। 'क्षिप प्रेरणे' क्षिप्, क्षिपति कश्चित्तमन्यः प्रयुङ्क्ते प्रेरणे ञिः, गुणे क्षेपि अनद्य० स् अपि गुणे अयि अक्षेपयः सिद्धं। 'ष्ठिवु क्षिवु निरसने' क्षिव्, क्षिवन्तं प्रेरयति प्रेरणे ञिः, गुणे क्षेवि, अनद्य० अम्, अक्षेवयं सिद्धं। 'पीव मीव नीव स्थौल्ये' मीव, मीवन्तं प्रयुङ्क्ते, शेषं सुगमम्, अमीवयं सिद्धम् ॥ २१ ॥———अन्येऽपि केचिद्विभ्रमप्रयोगा लिख्यन्तेः **"असतीति कथं साधु, करतीति तथाऽपरम्। कथमेतानि साधूनि, वोच्यते भवते सह ॥१॥"** 'अस गतिदीप्त्यादानेषु' 'कृञ् करणे'इत्येतयोर्भौवादिकयोर्वर्त्तमाने परस्मैपदप्रथमैकवचने असति करतीति रूपे सम्पद्येते, वचर्यङन्ताद्भावकर्म्मणोरात्मनेपदे यकि उत्तरस्य सम्प्रसारणे पूर्वस्य तु 'न सम्प्रसारणे सम्प्रसारण' मिति निषेधे उ ओ वोच्यते इत्येतत् सम्पद्यते। 'भू सत्ताया'मिति धातोरुदात्तेत्त्वात् परस्मैपदित्वे आत्मनेपदाभावे प्रश्नः, भू प्राप्तौ आत्मनेपदी भू, वर्त्तमाने, ते, अपः पित्त्वाद् गुणे भवते, न चैतदशुद्धमित्याशङ्कनीयम्, 'उत्साहाद्भवते लक्ष्मी' रिति स्मरणात्। सहेरनुदात्तेत्त्वात् परस्मैपदानुपपत्तेः प्रश्नः, 'षह मर्षणे' तुबादिहौ सह, न तु सहेः परस्मैपदप्रयोगे शङ्का कार्या, तथा च प्रयोगः,–"नदीकूलं भित्त्वा कुवलयवदुत्पाट्य च तरून्मदोन्मत्तान् हत्वा करणदन्तैः (शनैश्च) प्रतिगजान्। जरानारीमाप्त्वा तरुणजनविद्वेषणकरीं, स एवायं नागः सहति कलभेभ्यः परिभवम् ॥१॥" **मारिरेकाम मामिमीमाम मामीमिले तथा। असीदामादिका ज्ञेया, प्रयोगा अनया दिशा ॥ २ ॥** 'रेकृङ् शकृङ् शङ्कायां,' रेक्, रेकते कश्चित्तमन्यः प्रयुङ्क्ते 'धातोः प्रेरणे' इति ञिः, रेकि, अन० मप्र० 'ञेरङ् द्विश्चे' (७-२-१४) त्यङ् प्रत्ययः, द्विश्च मापूर्वः 'मेट' (७-३-११) इत्यटो लोपः, ञे ह्रस्वः 'न ऋत' इति (७-४-४१) पूर्वलघोर्दीर्घस्योपधाह्रस्वस्य च निषेधः, 'व्मोरा' (७-३-१५)-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





इत्यास्वे मारिरेकाम सिद्धं । 'अम द्रम हम मीमृ गमृ गतौ' मीम्, मीमन्तं प्रेरयति धातोः प्रे० ञिः, शेषं प्राग्वत्, न ऋतः, मामिमीमाम सिद्धं । ' मील स्मील क्ष्मील निमेषणे ' संकोचे इत्यर्थः, मील, मीलन्तं प्रेरयति प्रेरणे ञिः, अनद्य० इप्र० ' ' ञेरङ् द्विश्चे '-त्यङ् ( ७-२-१४ ) प्रत्यये द्विस्वे ' ञे ' रिति ( ७-४-७१ ) ञिलोपे लघोर्दीर्घः मामीमिले सिद्धं । ' षद् विशरणगत्यवसादनेषु, षद्, ' आदेः ष्णः स्नः ' अन० मप्रत्ययः अट् अप् ' दृशादेः पश्यादे ' रिति ( ७-४-८४ ) सदः सीदादेशे ' व्मोरा ' इत्यास्वे असीदाम सिद्धं । ' चादि आल्हादनादनयोः ' चद्, ' टुणादि समृद्धौ ' नत्वे नद्, ' वदि अभिवादनस्तुत्योः ' वद्, 'णिदि कुत्सायां' निद्, अत्यर्थं चन्दति नन्दति वन्दते निन्दति ' अतिशये हसादे ' रिति ( ७-३-५७ ) यङ् द्विश्च, ' वाऽन्यत्रे ' ति ( ८-२-२७ ) यङ् लुक् ' आत ' इति ( ७-४-३५ ) दीर्घः, चा, वा, ना, निदिधातोर्गुणः ' यङी ' ति ( ७-४-३४ ) पूर्वस्य गुणः अनद्य० स्, दिवादावट्, सौ पदान्ते रेफप्रकृत्योरपि द् र्, ' दिस्योर्हसा ' दिति ( ७-३-३ ) स्लोपः स्रो० अचाचः, अनानः अवावः अनेनेः इति सिद्धम् । 'शुच् शोके' शुच् 'क्रुध कोपे' क्रुध, 'क्रुध कुत्सायां' 'शृध् वृध वृद्धौ' वृध, 'गृध् अभिकाङ्क्षायां' गृध् अत्यर्थं शुध्यति क्रुध्यते शर्धते वर्धते गृध्यति, ' अतिशये ' ( ७-३-१५ ) हसादेरिति यङ् ' वाऽन्यत्रे ' ति यङ्लुक् द्विश्च 'यङी '-ति (७-४-३४) पूर्वनामिनो गुणः शो क्रो शृध्वृध्गृध्धातूनां ऋकारान्तानामिति वक्तव्ये न पूर्वस्य रुक् 'कुहोश्चु' रिति (७-४-२६) कुत्वस्य चुत्वं, दिवादावट्, गुणः, ' स धातु ' ( ७-४-१० ) रित्यनद्य० स्, अप्, ' अदे ' ( ७-३-१४ ) इत्यलुक्, 'दधो रत्व '-मिति ध् र्, ' दिस्योर्हसा ' दिति ( ७-३-३ ) स्लोपः, ' रिलोपो दीर्घश्चे ' ति रलोपः, दीर्घत्वं, अशोशोः अचोक्रोः अशर्शाः अवर्वाः अजर्घाः इति रूपाणि सिद्धानि । ' कस गतिशातनयोः ' कस्, अतिशयेन कसति यङ् ' वाऽन्यत्रे ' ति यङ्लुक्,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





' ह्वादिवच्च द्रष्टव्य ' मित्यनेन अवादि कार्यम्, अप्, द्विर्त्वं ' कुहोश्चुः ' ( ७-४-२६ ) अन० सू ' पदां नीगि ' ति पूर्वस्य नीक्. दिवादावट्, विपूर्वः, ' दिस्योर्हसादि ' ति ( ७-३-२ ) सू लोपः, स्रो०, व्यचनीकः सिद्धं ॥

बाणाश्विषडिन्दु ( १६२५ ) मितिसंव्वति धवलक्कपुरवरे समहे । श्रीखरतरगणपुष्करसुदिवापुष्टप्रकाराणाम् ॥ १ ॥ श्रीजिनमाणिक्याभिधसूरीणां सकलसार्वभौमानाम् । पट्टे वरे विजयिषु श्रीमज्जिनचन्द्रसूरिराजेषु ॥ २ ॥ गीतिः । वाचकमतिभद्रगणेः शिष्यस्तदुपास्त्यवाप्तपरमार्थः । चारित्रसिंहसाधुर्व्यदधादवचूर्णिमिह सुगमाम् ॥ ३ ॥ यल्लिखितं मतिमान्द्यादनृतं प्रश्नोत्तरेऽत्र किञ्चिदपि । तत् सम्यक् प्राज्ञवरैः शोध्यं स्वपरोपकाराय ॥ ४ ॥

## ॥ इति कातन्त्र(सारस्वत)विभ्रमावचूरिः सम्पूर्णा ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





# श्रीमद्राजशेखराचार्यकृता दानषट्त्रिंशिका सावचूर्णिः

अवतरणिका-बहवोऽपि हि देवाः क्षेत्रं मर्यादीकृत्य इन्द्रं यावत् तत्तद्वृद्धियुक्तास्तत्तत्स्थाननिवासिनस्तत्तत्कार्यकारिणः सन्ति, तेऽपि लोकोपकारनिरता धर्म्माद्युद्यमे सान्निध्यं पावित्र्यं संचिंत्य कुर्वन्ति, यथा भरते निधिस्था देवाः कृष्णे वैश्रवणः कर्णे सूर्यः नले युधिष्ठिरेऽपि रविः विक्रमे आगियाकः शालिवाहने भारती शेषौ जयसिंहदेवे बर्बरेश्वरौ, परं परमपु(पौ)रुषानुज्ञयैव विदधति, यतः-"कृतप्रतिज्ञस्य पुरुषस्य, देवा यान्ति सहायताम्" यस्य तु देवस्य स्थावराणामपि दातृणामुपकारकत्वं विलोक्य शृङ्गारादिसामग्रीं चकार, किं पुनर्विद्यावतां भाग्यवतां विशेषज्ञानां सत्क्रियाणां गुरुभक्तानां विवेकिनां ?, अत एवोच्यते--

**दातुर्वारिधरस्य मूर्द्धनि तडिद्गाङ्गेयशृङ्गारणा, वृक्षेभ्यः फलपुष्पदायिनि मधौ मत्तालिबन्दिश्रुतिः ।**
**भीतत्रातरि वृत्तिदातरि गिरौ पूजा झरैश्चामरैः, सत्कारोऽयमचेतनेष्वपि विधेः किं दातृषु ज्ञातृषु ? ॥१॥**

भाग्यवति उदयिनि कुले कश्चित्पुमानुत्पद्यते, सर्वगुणानां निधिः सः, यथा जले सर्वबीजानि यथा भूमौ सर्वान्नोत्पत्तिः, यथाऽग्नौ आहारशक्तिः, यथा इन्द्रे प्रभुत्वं, तथा सत्पुरुषे गुणाः, तेन महात्मना पुरुषेण सर्वं चित्ते ध्रियते, परं याचकेभ्यो दत्तं हृदयेन धार्यते, अतः श्रूयताम्-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पित्रोर्वत्सलता गुरोर्व्रतभृतः शिक्षाप्रसादः प्रभोः, सद्वृत्तं सुतकल्पभृत्यसुहृदां तत्तत्क्रियाभिग्रहाः ।
छन्दोज्योतिषतर्कलक्षणकथौचित्यं चिरं धार्यते, सर्वं सत्पुरुषैः क्षणादपि पराग् दत्तं तु नेत्यद्भुतम् ॥ २ ॥

पुरुषाहीनाः सेवका अपिकर्म्मकरा अपि निर्द्धना अपि कर्म्म कुर्वाणाः सर्वाणि सौख्यानि प्राप्नुवन्ति, परं श्रीभरतादिभिः सत्पुरुषैः समयं प्राप्य लोकोपकारः कृतः, तेन चासंसारं विश्वे कीर्त्तयः स्थिरतामानञ्चुः ॥ यतः--

आरोहन्ति सुखासनान्यपटवो नागान् हयाँस्तज्जुषस्ताम्बूलाद्युपभुञ्जते नटविटाः खादन्ति हस्त्यादयः ।
प्रासादे चटकादयोऽपि निवसन्त्येते न पात्रं स्तुतेः, स स्तुत्यो भुवने प्रयच्छति कृती लोकाय यः कामितम् ॥३॥

कलिकाले करालेऽस्मिन् सकलोपकारकाः कल्पद्रुमादयो लोकोपकारं न कुर्वन्ति, न च दृश्यन्ते, इन्द्रादयः सुखस्वादरसपरवशाः, पूर्वजास्तु भोगीभूय सन्तानिनां पीडां कुर्वते, तैः सार्द्धं सत्पुरुषस्य उपमा न घटते, सम्प्रत्यसत्त्वात्, जलधरस्तु सकलधरातलललितलावण्यकारी, उक्तञ्च-"सम्प्रति न कल्पतरवो न सिद्धयो नापि देवता वरदाः । जलद! त्वयि विश्राम्यति सृष्टिरियं भुवनकोशस्य ॥ १ ॥" तेन सार्द्धं सत्पुरुषस्योपमा युक्ता, जलधरस्य सत्पुरुषेण सहोपमा विद्यते, तथापि सत्पुरुष उत्तम एव, यतः-

स्फातिं बन्धुसरांसि यान्तु परितः कीर्त्तिश्रवन्त्यः स्फुरन्तूच्चैर्माद्यतु दीनदुर्दुरकुलं विद्वन्मयूरैः सह ।
म्लायन्त्याशु जवासकाः खलजनाः स्वर्णाम्बुदानोद्यते, सत्पाथोमुचि विस्मयोऽयमिह मे मालिन्यगर्जी न यत् ॥४॥

तिर्यक्षु सिंहादयो बले तुरङ्गास्तु शीघ्रगतौ भारोद्वहने वृषभाः दुग्धोत्पत्तौ गावः विषमे रणे राजद्वारे परमे लक्ष्मीविलासे महास्वप्ने उच्चत्वे गजा एव श्लाघ्यन्ते, तैः सार्द्धमुपमानं सत्पुरुषस्याहोश्विदाधिक्यं ?, आधिक्यमेव प्रतीमः, यतः-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तुङ्गाः सत्कुलविन्ध्यजाः सुगतयः सद्भावनावल्लकीसक्ताः श्रीसहचारिणो बहुविधग्रन्थार्थभोज्योर्जिताः ।
गुर्वाधोरणशिक्षिताः शमगुडामिथ्यात्ववद्दौःस्थ्ये कलेः, प्राकारौ दलयन्त्युपासकगजाश्चित्रं मदान्धा न यत् ॥५॥

एकेनापि सिंहेन बहवः शृगाला इव सूर्येण ध्वान्तानीव गंगाप्रवाहेण वृक्षा इव कुठारेण तरव इव तथा एकेनापि सत्पुरुषेण दात्रा ज्ञात्रा विवेकिना कलिकालोऽपि निर्जीयते; यतः--

एकेनापि खरादयो भुजभृता रामेण निष्कन्दिता, एकेनापि हनूमता विदलिता नक्तंचराणां चमूः ।
एकेनापि धनञ्जयेन पृतना दौर्योधनी चूर्णिता, दात्रा तत्त्वविदा कलिर्बलवतैकेनापि निर्जीयते ॥ ६ ॥

चातका जलधरमिव चक्रवाकाः सूर्यमिव चकोराः शशिनमिव गजा विन्ध्याचलमिव देवा मेरुमिव तथा याचका दातारं दृष्ट्वा हृष्टा भवन्ति, वावदूकाः सन्तः स्तुवन्ति, मनोरथशतैर्ध्यायन्ति, काव्यश्लोकषट्पद्यादिभिः स्तुवन्ति, यथा--

किं वज्राकर एव दन्तनिवहो ? जिह्वाऽस्य किं देवता ?, दृक्किं कल्पलता? स्मितं किमु सुधा ? किं कल्पवृक्षः करः?।
किं चिन्तामणयो नखाः ? किमु मुखं चन्द्रः?स्वरः शान्तिकं?, दृष्टेष्वर्थिजनस्य येष्विति मतिर्नन्दन्तु ते दानिनः ॥७॥

कृतयुगत्रेताद्वापरकलिषु दातारो बहवोऽभुवन्, चक्रवर्त्तिभरतमान्धातृदुष्यन्तहरिश्चन्द्रपुरूरवाऐलनलनघुषरामकर्णयुधिष्ठिरादयः, ते श्लोकवर्णनार्हाः, परं यथैते दातारोऽपि यस्य याचका यद्दत्वा चन्द्रार्कं स्थिराः तदेव दानं वयं दातृ (तुः) स्तुमः, यतः

दत्ता भूर्बलिना धनं रविभुवा दैलेपिणा धर्मिणा, राज्यं लक्ष्मणबान्धवेन करणं जीमूतकेतोस्तुका ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





एवं विक्रमसातवाहनमुखैर्दातार एते ततो, मन्ये दानमपि प्रदात् यदमी तद्दत्तकीर्त्या स्थिराः ॥ ८ ॥

भटकोटिकोटेर्गर्ज्जद्गजगलगर्जिस्फुटत्कर्णकुहरे सहर्षहयहेषितत्रस्तकातरगणे रणरसविलोकनकौतूहलितसकलसुरासुरदेवदेवीवृन्दे रणे रणंति सुभटाः प्रविशन्ति कुहरान्तरं तरन्ति दुस्तरं पारावारं तपन्ति विषमं तपः आरोहन्ति दुर्गमं गिरिं भ्रमन्ति करिकेसरिद्वीपिचित्रकव्यालवदनज्वालाजटिलमरण्यं तेऽपि याचकचमूं दृष्ट्वा श्यामा इव जायन्ते, मन्येऽहं न केवलं ते रुद्रादयोऽचलशिखरशिखामारूढास्तद्भयादेव, परं किञ्चित्(कोचि)कुलधवला धन्या यशस्विन आसन्नसिद्धिकाः पुण्यवन्तो विषमेऽपि कलौ दानदयादाक्षिण्योपकारनिरता दृश्यन्ते, यतः

रुद्रोऽद्रिं जलधिं हरिर्द्दिविषदो दूरं विहायः श्रिताः, भोगीन्द्राः प्रबला अपि प्रथमतः पातालमूले स्थिता ।
लीना पद्महृदे सरोजनिलया मन्येऽर्थिसार्थाद् ह्रिया, दीनोद्धारपराः कलाविह खले सत्पुरुषाः केवलम् ॥ ९ ॥

न केवलं धनेनैव पुरुषस्य कीर्तिः, पश्यत मेरौ सुवर्णं लक्षयोजनसङ्ख्यं वैताढ्ये रूप्यानन्त्यं रोहणाचले वज्राकरत्वं ताम्रपर्ण्यां मुक्ताफलानि तथा सर्वासु खानिषु, अथवा एते अचेतना मूढाः पाणिपादवक्त्रविकला यदि न यच्छन्ति तदा न चित्रं, परमिन्द्रादयोऽपि विभवे सति न यच्छन्ति तच्चित्रं, अत एव किं वर्ण्यन्ते ते ?, सत्पुरुषस्तु वर्ण्यतां, य एवं सर्वोपकारनिरतः, यतः—

प्रायः सत्यपि वैभवे सुरजनः स्वार्थी न दत्ते धनं, तीर्थान्नोद्धरति क्वचिन्न हरति व्याधीन् न हन्त्यापदम् ।
अस्त्वात्मंभरिभिर्जनैर्युगालिभिर्धन्यास्तु केचिन्नराः, सर्वाङ्गीणपरोपकारयशसा ये द्योतयन्ते जगत् ॥१०॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir







दाता चिन्तयति-तावत् सूर्यस्य सर्वप्रकाशकत्त्वात् तिमिरध्वंसनात् लोकोपकारकारकात् स्तुतिः, चन्द्रस्यापि तथैव, समुद्रस्यापि व्यवसायिनां मनोरथपूरकत्त्वात् लक्ष्मीजनकत्त्वात् रत्नाकरत्त्वाच्च महाविस्तीर्णपृथ्वीकुण्डलास्तुतिः, एवं नदीनां पृथिव्याश्च सर्वोत्पत्तिताप्रशंसा, तथा कालस्य धर्म्मस्य ऋतूनां सर्वोपायैरुपकारकत्त्वात्, इन्द्रादीनां मनसा सर्वेच्छादायकत्वात्, ऋषीणां च वचनमात्रेण परेषां कार्यसाधकत्त्वात्, परं मम का प्रशंसाऽत एवोक्तिः—

**दाता ध्यायति विष्टपं कियदिदं ? तत्रापि भागास्त्रयस्तत्राल्पा वसुधाऽम्बुधिर्यद्वधिस्तत्रापि खण्डान्यहो ।**
**तत्रैकत्र वसामि तद्गिरिसरित्कान्ताररुद्धं ततः, का शक्तिः? किमुपाददे? किमु ददे? यद्दातृशब्दो मयि? ॥११॥**

सकलस्य विश्वस्य दाता एव धर्म्मः, यस्मादुदयं प्राप्य धर्म्मचक्रवर्त्तिचक्रवर्त्त्यादयो याच्यन्ते, यद्भाग्यमसामान्यं येन केवला श्रीर्भवति, भाग्यवतां तु श्रीमुञ्जवत् सरस्वत्यपि वदनकमलवासिनी भवति, तुष्टश्च धर्म्मः किं किं न प्रापयति?, अतः कारणात् सेवातुष्टेन धर्म्मेण दातुर्गृहे द्वयं दत्तं, अत एवाह--

**दत्ता सत्पुरुषाय यद्यपि मया तुष्टेन सेवाभरात्, पुत्री श्रीर्विनयं नयं सुवचनं दानं विवेकं विना ।**
**काऽस्याः श्रीर्विनयादयश्च धिषणासाध्याः कुतः सा विना, ब्राह्मीं? तेन सखीयमस्त्विति युते ते तत्र धर्म्मो व्यधात् ॥१२॥**

यो हि अहर्निशं सद्गुरुभक्तिं कुरुते आत्मनः शरीरस्य च साधनां विदधाति सर्वलोकोपकारी सर्वव्यापी स सिद्धः, यस्य शरीरं न बुभुक्षया नापि आतपेन शीतेनापि न नापि जलेन नापि ज्वलनेन नापि निद्रया नापि कोपेन, किन्तु समचित्तः सर्वत्र स महात्मा दाता सिद्धतां दर्शयति, सिद्धावस्थाकार्यं करोति, यतः—

॥ ५७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्राग्दारिद्र्यलिपिं भनक्ति लिखितां दैवेन भालेऽर्थिनां, प्रत्यक्षानिव दर्शयत्यतिगतान् प्राच्यानुदारान् कवीन् ।
धत्ते दुष्टयुगेऽपि शिष्टयुगतां लक्ष्मीं प्रकृत्या चलामाचन्द्रं स्थिरतां नयत्ययमहो दानेन सिद्धः कृती ॥ १३ ॥

मूलवशीकरणहेतोरौषधानि मेलयन्ति, तिलकादि कुर्वंति, मन्त्रान् गृह्णन्ति, पर्वतादौ जपध्यानहोमेन यत्नान् कुर्वन्ति, भूतप्रेतपिशाचजटिलामरण्यानीं भ्रमन्ति, सिद्धान् सिद्धौषधं प्रार्थयन्ति, देशान्तराणि भ्रमन्ति, निद्रां कुटुम्बं पत्नीं पुत्रान् मातापितॄन् मुक्त्वा जनं जनं पृच्छन्ति, तथापि सिद्धिस्तेषां सन्देहास्पदं, परं दानेनाऽऽमोक्षं सर्वमनोरथप्राप्तिः, यतः--

आदौ पात्ररतिस्ततः कृशदया निर्लोभता निर्मला, धर्म्मश्रीरथ कीर्त्तिरिन्दुकुमुदाहङ्कारसर्वंकषा ।
स्वर्भोगर्द्धिरथानघा नृपरमा चारित्रलक्ष्मीरथाकृष्टा मुक्तिरुपैत्यहो वितरणं स्त्रीवश्यसिद्धौषधम् ॥ १४ ॥

आदौ तावन्मनुष्याः सामान्याः कलाविदः, तदनु पातालवासिनो देवाः, ततो व्यन्तरज्योतिष्कसुरसुरपतिअहमिन्द्रगणधरादयः, तेभ्योऽपि त्रिभुवनस्वामी छत्रत्रयच्छायासुखशिराः तीर्थंकरस्तस्यापि करः यस्य करतार इत्याख्या पञ्चशाखः साक्षात् कल्पद्रुमः सोऽपि दातुः करादधो भवति, अत एवोच्यते—

यो बभ्राम ससंभ्रमप्रणतभूपालेन्द्रपृष्ठस्थले, विश्वं वात्सरिकप्रदत्तिसुधिया प्रोज्जीवयामास यः ।
यः साध्वाद्यनवद्यसंघशिरसि क्रीडोचितः सोऽर्हतः, पाणिः स्याद्यदनुग्रहाद् गृहिकराधस्तां स्तुमो दातृताम् ॥ १५ ॥

धन्यः कृती सर्वत्रोचितां पूजां करोति, आसनादिकां कुसुममयीं चाष्टम्यां रुद्रस्य एकादश्यां नारायणस्य चतुर्दश्यां ब्रह्मणः सन्ध्यायां सूर्यस्य विवाहादौ गणपतेः अभ्रोदये साधोर्यथा तीर्थेषु तीर्थनायकानां कुटुम्बस्य च, परं लक्ष्म्याश्रिताः सकलाः शोभा-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





द्या भवन्ति उत्सवाः, अतस्तस्या एवागताया गृहपूजां वितन्वन्ति महान्तः, पूजया तुष्टा देवी तस्य गेहं न मुञ्चति, अत उच्यते—

औदार्यं कनकासनं सुवसनान्यक्रौर्यलज्जर्जुताः, श्रद्धाचन्दनलेपनं सुविनयन्यायौ मणीकुण्डले ।
मुक्तावल्लिरिरौचिती वितरणं कोटीरमेवं श्रियं, देव्याँ गेहगतां कृती महति यस्तस्य स्थिरा सा रसात् ॥ १६ ॥

ये शूरा ये च विद्वांसो, ये च सेवाविचक्षणाः । सर्वे ते धनवृद्धस्य, द्वारे तिष्ठन्ति किङ्कराः॥१॥ धनं कारणं, येनाविद्यमाना अपि गुणाः प्रकटीभवन्ति, विद्यमाना अपि यान्ति यस्याभावात्, "धनमर्जय काकुत्स्थः, धनमूलमिदं जगत् । अन्तरं नैव पश्यामि, निर्द्धनस्य मृतस्य च ॥१॥ लक्ष्मीः पूर्वपुण्यरज्ज्वाकृष्टा मम गेहं प्राप्ता, परं-या यस्य प्रकृतिः स्वभावजनिता कष्टेन सा त्यज्यते, इतीयं कमला क्षणं कुमुदे क्षणं चन्द्रे क्षणं सूर्ये मान्धात्रादीनां गृहे चिरं नो वासः, अतोऽस्या अनुवृत्तिरेव क्रियते इति संचिंत्योवाच—

लक्ष्मीर्मे सुकृतेन यद्यपि गृहे न्यस्ता तथाऽप्येतया, नानास्थाननिवासशीलमनवं दुर्म्मोचमित्यग्र्यधीः ।
सत्रार्हद्गृहबिम्बपुस्तकवसत्युद्यापनाद्यैरिदं, तस्याः पुष्यति वश्यबीजमपरं भावानुवृत्तेर्न हि ॥ १७ ॥

महाकुले जलधावुत्पन्नः सर्वलोकप्रियः शीतलकरः कलावान् तेन चन्द्रमसा सार्द्धं उपमां दातुं विचारयामः, परं तेनापि सह न समीचीना राजते, दातरि विशेषदर्शनात्, यतः—

सङ्घाम्भोधिविवर्द्धनः शुभकरः सद्वंशपूर्वाचलोद्भिन्नः सज्जनकैरवप्रमदनः सौम्यस्तमःस्तोमहा ।
सम्प्रीतार्थिचकोरकः सुतसुहृन्नक्षत्रतारागृहो, दातेन्दुर्न पुनः क्षयी न च जडो नान्तः कुरङ्गोऽद्भुतम् ॥ १८ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



